दिनांक 30-4-21 शास्त्री द्वितीय खण्ड, विषय- व्याकरण
ग्रन्थ- प्रौढमनोरमा

प्रश्न - पूर्वत्रासिद्धम् अस्य सूत्रस्य शब्दरत्नोक्तदिशा व्याख्या कार्या:

उत्तर - तत्रैव गोधुङ्मानित्यादौ धत्व जश्त्वानुनासिकेषु मध्ये भावो न स्यात्। न चात्र देशान्तरवदस्यापि तुपाधां प्रवृत्तौ न दोषः। सपादसप्ताध्यायीमपि पूर्वं प्रति परासिद्धत्वापत्तेः। मध्ये पाठस्य विप्रतिषेध सूत्रस्य च सामर्थ्याश्रयणे तु विनिगमना विरहोऽपि पाद्यामप्रवृत्त्यापत्तिः। रोरि इत्यस्य प्रसङ्गात्। सिद्धेऽसिद्धत्वारोपात् सूत्रोदाहरणसम्पत्तौ परत्वाल्लक्ष्ये कार्यप्रवृत्तिरावश्यकतया परत्वात् त्रैपादिके कार्ये जाते तन्नाभावप्रतियोगित्वारोपेऽपि देवदत्तहन्तृहत न्यायेन स्थानिभूत रोरभावाद् दृष्टि च इत्यस्या प्राप्तिः। स्पष्टं चेदं प्रकृतसूत्रे अचः परस्मिन् पूर्वविधौ इत्यत्र भाष्ये तु कोः इत्यत्र च भाष्ये उक्तम्।

तथा च शास्त्र तद्बोध्य कार्यस्य च शास्त्रज्ञान विषयामसिद्धत्वाभावे रोरि इत्यादेः प्रसङ्गश्चेत्यर्थः। व्याख्यातिर्यथा निष्प्रतिरोध शास्त्र प्रवृत्तौ निमित्तस्य शास्त्रबोध्य विषयकार्यस्य, शास्त्रस्य वाऽसिद्धता वक्तुम् शक्या, किन्तु लक्ष्ये जातस्य तस्य प्रवर्तमान सपादसप्ताध्यायिस्थ कार्य दृष्ट्याऽसिद्धत्वम्। एवं च विप्रतिषेधाभावोपपादक हेतोरसिद्धेरिति भावः।

न च ममापि पूर्वपरपदयोः पूर्वपरशास्त्रजन्यबोध्यविषय कार्यलक्षणया शास्त्रे एव कार्यसिद्धत्वमिति वाच्यम्। लक्षणाया मानाभावात् कल्पनाभावात् गौरवाच्च।

ननु मनोरथे दर्शनाभावरूपे लोपेऽभावारोपस्य दर्शनारोप रूपत्वे ना दोषः। अभावाभावस्य प्रतियोगिरूपत्वात्। अमू, अमी इत्यादौ अद् अ औ, अद् अ अस् इत्यवस्थायां जातयोरुत्वयोः सपादसप्ताध्यायिस्थ कार्य दृष्ट्याऽसिद्धत्वेऽपि पूर्वरीत्याऽकाराभावेन पररूपाद्यापत्तिः। मुत्वस्यासिद्धत्वनिषेध

उपशास्त्री प्रथमवर्ष, विषय - व्याकरण
ग्रन्थ- सिद्धान्तकौमुदी (हलन्त पुंल्लिङ्ग प्रकरणम्)

दिनांक ~~[illegible]~~ 30-4-21

1 राजा – राजन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण ड्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण सु विभक्तौ अनुबन्धलोपे। हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इति सुलोपे। नलोपः प्रातिपदिकान्तस्य इति नलोपे। तथा सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण उपधादीर्घे राजा इति सिद्धम्।

2 राज्ञः – राजन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्रसहकारेण शस् विभक्तौ अनुबन्धलोपे। अल्लोपोऽनः इति सूत्रेण जकारोत्तरवर्ति अकारस्य लोपे। स्तोः श्चुना श्चुः इति श्चुत्वे नकारः ञकारः जकार ञकार संयोगे कृते सकारस्य स्थाने रुत्वे विसर्गे राज्ञः इति सिद्धम्।

3 यज्वनः – यज्वन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायाम् स्वौजस् इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्रसहकारेण शस् विभक्तौ, अनुबन्ध लोपे। यज्वन् अस् इति जाते। अल्लोपोऽनः इति सूत्रेण अकार लोपे प्राप्ते, न संयोगाद् वमन्तात् इति सूत्रेण अकारलोपनिषेधे सकारस्य रुत्वे विसर्गे यज्वनः इति सिद्धम्।

4 वृत्रहा – वृत्रहन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायां स्वौजस् इति सूत्रेण तथा ड्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण सु विभक्तौ, अनुबन्ध लोपे। सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण उपधा दीर्घे प्राप्ते, इन्हन्पूषार्यम्णां शौ इति सूत्रेण दीर्घ निषेधे, पुनः सौ च इति सूत्रेण दीर्घे कृते, हल्ङ्याब्भ्यो- इति सूत्रेण सुलोपे तथा नलोपः प्रातिपदिकान्तस्य इति सूत्रेण नलोपे कृते वृत्रहा इति सिद्धम्।

अमरनाथ मिश्र
ए० सो० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुबलैना पूर्णिया

दिनांक 30-4-21

उपशास्त्री द्वितीय वर्ष - विषय - व्याकरण
ग्रन्थ - सिद्धान्त कौमुदी (स्वादिगणः)

1 असावीत - षुञ् धातोर्लुङ्, लुङ्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये। इतश्च इति इकारलोपे। धात्वादेः षः सः इति सूत्रेण सत्वे। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे अनुबन्ध लोपे। च्लि लुङि इति सूत्रेण च्लि प्रत्यये, च्लेः सिच् इति सूत्रेण सिजादेशे, अनुबन्ध लोपे। अ सु स त् इति स्थिते स्तु सु धूञ्भ्यः परस्मैपदेषु इति सूत्रेण सिचो इडागमे अनुबन्ध लोपे। आर्धधातुकत्वात् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे अनुबन्ध लोपे। इट ईटि इति सूत्रेण सलोपे। सिचि वृद्धिः परस्मैपदेषु इति सूत्रेण वृद्धौ, एचोऽयवायावः इति सूत्रेण आवादेशे। सवर्णदीर्घे कृते असावीत् इति सिद्धम्।

2 चिनोति - चिञ् धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुकसंज्ञायां, शप् प्राप्ते स्वादिभ्यः श्नुः इति सूत्रेण श्नु प्रत्यये अनुबन्ध लोपे। सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे चिनोति इति सिद्धम्।

3 चिनुते - चिञ् धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। सार्वधातुकसंज्ञायाम्, शप् प्राप्ते स्वादिभ्यः श्नुः इति सूत्रेण श्नु प्रत्यये अनुबन्ध लोपे। सार्वधातुकत्वात् गुणे प्राप्ते, ङित्वात् गुणनिषेधे चिनुते इति सिद्धम्।

4 चिकाय - चिञ् धातोर्लिट्, लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये परस्मैपदानां णल... इति सूत्रेण तिपस्थाने णलादेशे अनुबन्ध लोपे लिटि धातोरनभ्यासस्य इति द्वित्वे, अभ्याससंज्ञायाम्, विभाषा चेः इति सूत्रेण वा कुत्वे, अचो ञ्णिति इति सूत्रेण वृद्धौ। एचोऽयवायावः इति सूत्रेण आयादेशे चिकाय इति सिद्धम्। कुत्वाभावे चिचाय रूपं भवति।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि० सुरसेना
पूर्णिया

सामान्ये देतद्विषये उक्तन्यायाप्रवृत्तिरिति चेत्, तेन शास्त्रा
सिद्धत्वमेव ज्ञापितुमुक्तम्। एवं शीभावात् पूर्वम् ~~अदसो~~
अदसो मात् इति मुत्वे तात्पर्ये काराभावेन एत इति इतिमू प्रगृ
ह्यसंज्ञैव ज्ञापकमस्तु। न च तौ सत् इत्यादिनिर्देशो देवदत्त हन्तृ
हतन्यायोऽनित्य इति वाच्यम्। हते देवदत्ते तद्धन्ति हतेऽपि नोन्मज्जने
हतत्वारोपे तु सुतरम्। हन्तुर्मुख्यतस्य हनने तु उज्जीवनमस्त्येव इति
न्यायशरीरम्। तौ इत्यादौ वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य हननो
द्यमसजातीयप्रसंगमात्रं न तु हननस्थानीया लक्ष्ये प्रवृत्तिरिति न
तत्रास्य न्यायस्य विषय इति तेनास्यानित्यत्वबोधनासम्भवात्। स्पष्टं चेदं
स्वादिष्वसर्वनामस्थाने इति सूत्रे कैयटे। प्रकृते तु निरवकाशत्वेना
रोपासम्भवेन हननसजातीयप्रयोगे कार्यप्रवर्तनमावश्यक
मेव। विहितं कार्यमित्यध्याहारे गौरवाच्च।
किं च त्रिपादीशास्त्रं तद्विधानकारणं न त्वधिकरणम् त्रिपादी
मानेन शास्त्रेण विहितं कार्यमिति व्याख्याने त्वसन्तं क्लिष्टत्वापि
बोध्यम्। त्रिभिश्च मध्यमैर्वर्गैः इति भाष्यपर्यालोचनया
कखगघङ इत्यादीनामपवादित्वम्।

अमरनाथमिश्रः
एसो॰ प्रो॰ व्याकरण
२१.३० सं॰ म॰ वि॰
सुरवसेना पूर्णिया